।। अथ पंचसप्ततितमोऽध्याय: ।। Chapter-75

मांधातोवाच:-

~~मांधातोवाच~~

गौतमादिर्जैन धर्मो मह्यं वै कथितस्त्वया ।।
अधुना श्रोतुमिच्छामि श्रीमालानुग्रहं प्रभो ।। १

श्रीमालं श्रिया: क्षेत्रं पुराणं देवनिर्मितम् ।।
भविष्यति कथं शून्यमुत्पन्नं कौतुकं मम ।। २
तस्मात्त्वं कृपया ब्रूहि ए तत्सर्वं समासत: ।। ३

वसिष्ठ उवाच :-

परिपूर्णे च श्रीमाले चातुर्वर्ण्येन संवृते ।।
आगतं च कलिंग ज्ञात्वा कामक्रोधादि-वैरिणौ: ।। ४

प्रेरयिष्यति वैश्यन्तु ह्यात्मनो गमनाय वै ।।
देव्या च प्रेरितो राजन् श्रीमाले चागमिष्यति ।। ५

सुनन्दनामा वैश्यश्च जातो नन्दकुले शुभे ।।
धनवान् बहुलो राजन् पट्टाणापुरवासी च ।। ६

तत्र गत्वा श्रियार्थं तप: कर्तुं व्यवस्यति ।।
तस्मै तुष्टा तु सा देवी ईदृशं च वदिष्यति ।। ७

देव्युवाच :- वरं वरय भद्रं ते यत्ते मनसि वर्तते ।। ८

वैश्य उवाच :- यदि तुष्टासि मां देवि वरमेकं च देहि मे ।।
मम देशे च मां मातः स्थितिं कुरु निरन्तरम् ।। ९

देव्युवाच :- आगामिष्ये च ते देशे पट्टणे गुर्जरे मया ।।
स्थितिं तत्र करिष्यामि तव देशे निरन्तरम् ।। १०

वसिष्ठ उवाच :- एवं दत्वा वरं देवी वैश्यायापि नृपोत्तम ।।
द्विजाज्ञया विना देवी श्रीमालान्नैव गच्छति[१९] ।। ११

तस्या अर्थे तु सा देवी भारद्वाजकुले द्विजम् ।।
करिष्यति बुद्धिहीनं पश्चात्तं च वदिष्यति ।। १२

देव्युवाच :- आज्ञांदेहीति मां विप्र गच्छामो गुर्जरे वयम् ।।

विप्र उवाच :- तुभ्यमाज्ञां च मां देवि किमर्थं वै ददाम्यहम् ।। १३

देव्युवाच :- तुभ्यं विप्र सुनन्दस्त दास्यते विपुलं धनम् ।। १४

वसिष्ठ उवाच :- निष्काणां नव लक्षाणि सुनन्दात्संप्रगृह्य च ।।
धनलुब्धो द्विजवरः श्रियै आज्ञां ददौ तदा ।। १५

१९ गच्छयेत्

तज्ज्ञात्वा ब्राह्मणा: सर्वे शीघ्रं तत्र समागता: ।।

द्विजा ऊचु: केन कारणे[1] वै विप्र आज्ञा दत्ता श्रिये त्वया ।।
त्वादृशाश्च श्रिया: यत्र वसन्ति बहुला जना: ।। १६

त्वां विना दुष्ट केनापि दत्ताज्ञान श्रिये कदा ।। १७

देव्युवाच :- मांमां विप्राश्च मां लोका विप्रे दोषा न दीयताम् ।।
अस्माकमीदृशी वृत्तिर्गच्छाम: खण्डगुर्जरे ।। १८

वसिष्ठ उवाच :- द्विजा एतत्समाकर्ण्य श्रीमाले र्धनोपता: ।।
देवीमूचुस्तदा तत्र नमस्कृत्य पुन: पुन: ।। १९

त्वां विना मात: श्रीमाले करवाम नहि स्थितिम् ।।
त्वां विना अत्र श्रीमाले किं करवाम[1] वयं जना: ।। २०

त्वयि गतायां श्रीमालं निर्धनं च भविष्यति ।।

देव्युवाच :- मां मां विप्राश्च मां लोका मा शोकं कुरुतात्र वै ।।
श्रीमालवासी लोकस्तु मम भक्तिं करिष्यति ।।

-o-

१ ए किं कुर्मो
१ अ.ए कारणेन

मया च पूरितो विप्रा युष्मान्वै पूजयिष्यति ।।
श्रीमालपुस्तकं ये तु पूजयिष्यन्ति वै जना: ।।
मम माहात्म्यं कुर्वन्ति भक्तियोगेन तत्परा: ।। २२

तेषां गृहे सदाहं तु निवत्स्यामि निरन्तरम् ।।
येषु कार्येषु मां पुत्रा: स्मरिष्यथ यदा यदा ।। २३

तदा तदा च तत्कार्यं पूरयिष्ये ह्यसंशयम् ।। २४

वसिष्ठ उवाच :- ईदृशश्च श्रिया विप्रै: संवादश्च भविष्यति ।। २५
अग्निखाब्धिभूमितेऽब्दे वत्सरे विक्रमे तथा ।।
वैशाखे शुक्लपक्षे च ह्यष्टम्यां च शुभे दिने ।।
गमिष्यति च सा देवी पट्टणे संस्थिते ।। २६

श्रियां गतायां श्रीमालं कान्तिहीनं भविष्यति ।।
यत्र गमिष्यति श्रीस्तु लोकस्तत्र गमिष्यति ।। २७

-०-

१ ए दोष
२ ए दिने

लोके गते तच्छ्रीमालं शून्यं सर्वं भविष्यति ।।
भिन्नमाल इति नाम भविष्यति ततो नृप ।। २८

श्रियां गतायां लोका भविष्यन्ति हि निर्धना: ।।
एवं विधाश्च ते लोका स्थान भ्रष्टा भवन्ति हि ।। २६

क्षत्रियाश्चैव वैश्याश्च श्रीमालवासिनो नृप ।।
गोत्रहीना: कर्महीना भविष्यन्ति कलौ युगे ।। ३०

ब्राह्मणास्तत्र वै राजन् कृषिकर्मरता: सदा ।।
संध्यागायत्रीकंजाप्य वेदहीना भवन्ति हि ।। ३१

कर्महीनाश्च ते लोका इच्छाधर्मं चरन्ति हि ।।
एतत्प्रमाणं श्रीमालमाहात्म्यं कथितं तव ।। ३२

शिव उवाच :- एतन्मया समासेन कथितं च तवानघ ।।
श्रीमालमुत्तमं क्षेत्रं सर्वतीर्थादिसंयुतम् ।। ३३

न श्रीमालसमं क्षेत्रमन्यमस्तीह भूतले ॥
वासस्तत्रैव वेच्छन्ति देवा वै श्रीनिकेतने ॥ ३४

श्रीमालवासिनो लोका धन्याः सन्त्यवनीतले ॥
मानुषीं तनुं प्राप्य देवाभोगाञ्च भुञ्जते ॥ ३५

श्रीमालवासिनां भोगा देवानामपि दुर्लभाः ॥
श्रीमाले च श्रियाः क्षेत्रे श्रिया युक्तो वसुंधरिः ॥ ३६

तत्र ब्रह्मादयो देवा वसन्ति च निरन्तरम् ॥
भक्तियुक्तो मनुष्यो हि श्रीमालं च शृणोति यः ॥ ३७

१ए
गन्धपुष्पाक्षतैर्धूपैर्दीपैश्च पूजयिष्यति ॥
तस्य गृहे श्रिया वासो भविष्यति निरंतरम् ॥ ३८

-o-

१ ए पुष्पा

अश्वमेधसहस्त्रेषु नरमेधशतेषु च ।।
पुष्करादिषु तीर्थेषु गंगादि सरित्सु च ।। ३९

स्नानेन यत्फलं प्रोक्तं श्रुत्वा तत्फलमाप्नुयात् ।।
श्रीमालपुस्तकं गेहे लिखित्वा यो न्यवेशयेत् ।। ४०

पुस्तकस्था सदा लक्ष्मीस्तत्रैव वसति ध्रुवम् ।।
इदं श्रीमालमाहात्म्यं ये श्रृण्वन्ति जना नृप ।। ४१

तेषां प्रीता महालक्ष्मी: संपत्सर्वा: प्रयच्छति ।। ४२

-०-

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां
तृतीय परिच्छेदे ब्रह्मविभागे श्रीमाल माहात्म्ये भिन्नमालमाहात्म्यं
नाम पंचसप्ततितमोऽध्याय: ।।

------

।। संपूर्णमिदं श्रीमालमाहात्म्यम् ।।